श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री परकालयति कृतः

# ॥ आचार्यावतारघट्टार्थः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri R. Thirunarayanan of Srirangam for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ आचार्यावतारघट्टार्थः ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

ब्रह्मतन्त्रस्वतन्त्रेण परकालयतीन्दुना।
आचार्यावतारघट्टार्थस्सङ्ग्रहेण प्रकाश्यते॥ १ ॥

श्रीमद्वेदान्तसूक्ष्मार्थनिश्चयाय चलात्मनाम्।
श्रीमानाद्यो गुरुः पञ्चलक्षग्रन्थानुपादिशत्॥ २ ॥

चतुरश्चतुरो ग्रन्थान् श्रीशठारिस्ततो व्यधात्।
ततः श्रीनाथयोगीन्द्रो ग्रन्थद्वयमुदाहरत्॥ ३ ॥

पुनः श्रीयामुनाचार्यो ग्रन्थानष्टावुदाहरत्।
श्रीरामानुजयोगीन्द्रस्ततो ग्रन्थान्नव व्यधात्॥ ४ ॥

तत्सिद्धान्तसमृद्ध्यर्थं तद्विरोधिक्षयाय च।
स्वप्ने श्रीशप्रेरित श्रीरामानुजनिदेशतः॥ ५ ॥

संस्कृतप्राकृतागत्स्यभाषास्तोत्रसुभाषितान्।
विंशत्यधिशतग्रन्थांश्चक्रे वेदान्तदेशिकः॥ ६ ॥

प्रकृतानुगुणान् ग्रन्थान् सुबुहूंश्च तदा तदा।
वितेने निगमान्तार्यस्तेषां सङ्ख्या न विद्यते॥ ७ ॥

न चैवाद्यगुरुप्रोक्तग्रन्थवद्बहु विस्तराः।
न चार्वाचीनरचितग्रन्थवल्लघवोऽपि च॥ ८ ॥

अन्यूनाधिकसंपत्तियुक्ता वेदान्तसारदाः।
एकैकस्मिन्नपि ग्रन्थे त्वेकप्रकरणेऽपि च॥ ९ ॥

www.prapatti.com

स्वरूपोपायपरमपुरुषार्थप्रकाशकाः।
ग्रन्थाः श्रीनिगमान्तार्यरचिता बहुसम्मताः॥ १०॥

निगमान्तगुरुप्रोक्तं ग्रन्थं कञ्चित् पठन्ति ये।
विमतस्थान् समस्तांश्च ते जयन्ति न संशयः॥ ११॥

अत एव पुरा श्रीमद्रङ्गनाथेन च श्रिया।
सन्तुष्ट्याशासितं तस्मिन्नुत्सवे फाल्गुनोत्तरे॥ १२॥

वेदान्ताचार्यरचितप्रबन्धास्सारदर्शिनः।
पर्याप्तमावयोश्श्रोत्रोः किं वा ग्रन्थान्तरायुतैः॥ १३॥

इत आकल्पमालीलमनिन्द्यं मामकं मतम्।
अव्याहतं भवेदेतदत्र मे नास्ति संशयः॥ १४॥

तस्मात्पश्चात्तनग्रन्थो मास्तु मास्तु महीतले।
माचास्मत्सन्निधौ तेषामर्चा सम्मानमित्यपि॥ १५॥

एतत्त्रैलोक्यनिर्माणत्राणसंहारकारणम्।
आवयोरपराभूतं शासनं शाश्वतं परम्॥ १६॥

एवं मया श्रिया चैव सत्यं शप्ताः स्थ सज्जनाः।
अन्यथाचरतः पुंसः क्षिपाम्येवाचिरादिति॥ १७॥

रम्यजामातृयोगीन्द्रस्तत्परीक्ष्य च शासनम्।
मास्त्वेव मामकार्चादीत्यन्वशात् स्वपदाश्रितान्॥ १८॥

यथार्थानेवमाद्यर्थान् दर्शयन्ती स्फुटं ततः।
सद्भिरेषा परिग्राह्या संप्रदायप्रकाशिका॥ १९॥

सन्तश्शुद्धान्तसिद्धान्तास्सन्तुष्टास्सन्तु सन्ततम्।
असन्तोऽतः पलायन्तु निन्दन्तश्शान्तसन्ततिम्॥ २०॥

www.prapatti.com

परकालमुनेः प्रणतिं कलये चिरकालकृतैस्सुकृतैरमितैः।
नरकापनयो यदधीनतरो नरकारिरयं यदुपान्तचरः ॥ २१ ॥

॥ इति आचार्यावतारघट्टार्थः संपूर्णः ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥

www.prapatti.com